शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

# अलङ्कार विवेचनम्

रूपकालङ्कारस्य भेद सहित लक्षणोदाहरण प्रदर्शनम् ।

निषेधरहिते विषये उपमेये, उपमानस्य आरोपत्वेन प्रतीतिरेव रूपकमेवालङ्कारः। उक्तञ्च साहित्यदर्पणे —

'रूपकं रूपितारोपो विषये निरपह्नवे'। इति तच्च रूपकं परम्परितं साङ्गं निरङ्गमिति च त्रिधा भवति।

परम्परितम् — यत्र रूपके कस्यचिदेकस्य आरोप परारोपस्य कारणं भवति तत्परम्परित रूपकालङ्कारः कथ्यते। उक्तञ्च — 'यत्र कस्यचिदारोपः परारोपणकारणम् तत्परम्परितम्।' इति दिङ्मात्रमुदाह्रियते —

'आहवे जगदुद्दण्डराजमण्डलराहवे ।
श्रीनृसिंहमहीपाल, स्वस्त्यस्तु तव बाहवे ॥'

अत्र राजमण्डले नृप समूह एव चन्द्र बिम्बमित्यारोपो राजबाहौ राहुत्वारोपे निमित्तम् ।

साङ्गम् — साङ्गोपमेये साङ्गोपमानस्याभेदारोपः साङ्गरूपकम्। उक्तञ्च —

'अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ॥' इति

यथा — 'रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥'

अत्र कृष्णस्य मेघत्वारोपे विषये सत्येव वागादीनां तदङ्गानाम् अमृतत्वादि आरोपितम् अतोऽस्य साङ्गत्वम् ।

निरङ्गम् — केवलस्य अङ्गिन एव न तु साङ्गस्य उपमानस्य निरङ्गे उपमेये अभेदारोपणम्, निरङ्गाणि यत्र तत् निरङ्गं रूपकमुच्यते ।

उक्तञ्च — निरङ्गं केवलस्यैव रूपणम् ....' इति

उदाहरणं यथा —

'निर्माण कौशलं धातुश्चन्द्रिका लोकचक्षुषाम् ।
क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा ॥'

अत्रैकस्यामिन्दीवरेक्षणायामेवोपमेये निर्माण कौशलादीनां निरङ्गाणामेव त्रयाणामुपमानानाम् आरोपात् (मालारूपकम्) निरङ्गरूपकम् अलंकारः ।

इति

उपेन्द्र झा
14/12/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
कुरसेला, पूर्णियाँ

Dec 14

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पणः षष्ठः परिच्छेदः

कार्यस्य का अवस्थाः? कति च ताः? किं च तासां स्वरूपम्? सोदाहरणं निरूपणम्।

फलस्य इच्छुभिः प्रारब्धस्य कार्यस्य पञ्चावस्था भवन्ति। - आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमश्चेति।

आरम्भः - 'भवेदारम्भः औत्सुक्यं यन्मुख्यफलसिद्धये।' अर्थात् नायकः प्रधान प्रयोजनस्य निष्पत्तये य उत्कृष्ट इच्छा स आरम्भो भवेत्।
यथा - रत्नावल्यां रत्नावल्यन्तःपुर निवेशार्थं यौगन्धरायणस्य औत्सुक्यम् एव नायक नायिकादीनामौत्सुक्यम्।
यत्नः - 'प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः।' इति
अर्थात् फलं प्राप्तुं अतित्वरा युक्ता व्यापारस्य या क्रिया सा प्रयत्नो भवेत्।
यथा - रामचरिते समुद्रबन्धनादिः।
प्राप्त्याशा - 'उपायापाय शङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः।' उपायः = फलसिद्धेः हेतु सद्भावः, अपायस्य = प्रतिबन्धकस्य शङ्का च ताभ्यां प्राप्ति सम्भवः = उद्देश्यप्राप्ति सम्भावना, प्राप्तेः = प्रधान फललाभस्य आशा = प्राप्त्याशा भवेत्।
यथा - रत्नावल्यां तृतीयाङ्के सागरिकाया वासवदत्ता वेषकरणम्, तेन च राज्ञः समीपे तस्या अभिसरणम्। राज्ञः सागरिका सङ्गमोपायः वासवदत्ता रूप प्रतिबन्धक शङ्कया अनिश्चिता = संशयिता, या एकान्ते उद्यत सङ्गम रूप फलस्य प्राप्तिः, तस्या आशा प्राप्त्याशा इति। एवमन्यत्र।
नियताप्तिः - 'अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता।' इति
अर्थात् अन्तरायस्याभावात् निश्चिता फलप्राप्तिः नियताप्तिर्भवेत्। यथा रत्नावल्याम् - 'राजा - देवी प्रसादनं त्यक्त्वा नान्यमुपायं पश्यामि।' इति देवी वासवदत्तारूपान्तरायस्य प्रसादनेन निवारणात् नियत फलप्राप्तिः सूचिता।
फलागमः - 'सावस्था फलयोगः स्याद्यः समग्रफलोदयः।' अर्थात् यः सम्पूर्ण प्रयोजनानाम् उदयः, सावस्था 'फलागमः' इति कथ्यते।
यथा - रत्नावल्यां रत्नावली लाभः चक्रवर्तित्व-लक्षण फलान्तर सहितः। एवमन्यत्र द्रष्टव्यो निर्दिष्टे।

उपेन्द्र झा
14/12/20
एसो प्रो० साहित्य
रा० उ० सं० महा०वि०
पुरबैला, पूर्णियाँ

Dec 14, 2

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य
चतुर्थाङ्कस्य श्लोक व्याख्या ।

---

'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥'

प्रस्तुतोऽयं श्लोकः 'पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः। इत्यादि दिशा कवि कुलकमलदिवाकरायमानेन अप्रतिम प्रतिभा सम्पत्तिभासमानेन कविता वनिता विलासेन महाकविना कालिदासेन विरचितस्य त्रिदिवतनाट्यरत्नभूतस्य काव्यकला कलानिलयस्य सर्वथा नवं नवस्य नाट्य साहित्य शिरोरत्नभूतस्य संस्कृत साहित्य शिरोरत्नभूतस्य संस्कृत साहित्य नवनीत स्वरूपात अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कात् गृहीतोऽस्ति ।

श्लोकेऽस्मिन् शकुन्तलां तत्पतिगृहप्रेषणाय समुद्यतो महर्षिः कण्वः आश्रम वृक्षेभ्यः शकुन्तला स्वोपरिभ्योऽनुज्ञां दातुं प्रार्थयति —

या युष्मासु असिक्तेषु प्रथमं जलं पातुं न व्यवस्यति, प्रियमण्डनापि या स्नेहेन भवतां पल्लवं न आदत्ते, वः कुसुमप्रसूतिसमये आद्ये यस्याः उत्सवः भवति सा इयं शकुन्तला पतिगृहं याति सर्वैः अनुज्ञायताम् ।

या = शकुन्तला युष्मासु = भवत्सु असिक्तेषु = जलमपीतेषु प्रथमं = पूर्वं जलं = पानीयमपि पातुं = पीतुं न व्यवस्यति = उद्योगं न करोति नेच्छतीति भावः, प्रियम् = अभीप्सितं मण्डनम् = अलंकरणं यस्याः सा अलङ्कारप्रियापि या स्नेहेन = प्रेम्णा भवतां = युष्माकम् पल्लवं = किसलयं न आदत्ते = नहि गृह्णाति न लुनाति, वः = युष्माकं कुसुमानां = पुष्पाणां प्रसूतिः = उद्गमस्तस्य समये = काले आद्ये = सर्वप्रथमं यस्याः उत्सवः = महोत्सवं भवति = जायते सा इयं शकुन्तला पतिगृहं याति = गच्छति अतः सर्वैरपि = भवद्भिः अनुज्ञायताम् = अनुज्ञा प्रदानं कुर्वन्तु ।

अत्र चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात् काव्यलिङ्गम् — हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गं निगद्यते इति लक्षणात् । शार्दूलविक्रीडितं वृत्तम् - 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ।

उपेन्द्र झा
14/12/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
[illegible], अर्कियाँ